# क्रांतिदेवता जयजयकारम्

## (मराठी कवी कुसुमाग्रज यांच्या 'क्रांतीचा जयजयकार' चा भावानुवाद)

---

क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्।
वज्राघातान् उरःकपाटे सहध्वमक्लेशम् ॥ धृ ॥
पदकरनद्धा निर्दयनिगडा रटन्तु विकटरवम्
मरणव्दारे स्थितस्य जंतोः किमस्ति लोहभयम्
मणिबंधस्थं सर्पाः पाशं वलयध्वं निचितम्
ध्वस्ताः स्युर्मणिबंधा यद्यप्यभंगमात्मबलम्
तडित्प्रहारैस्ताराणां किं भवेदधःपतनम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥१॥
निर्घृणनृत्यं करोतु जठरे हिंस्राक्षुत् कामम्
अन्त्रं कृन्ततु यथेष्टमथवा पिबतु तथा रुधिरम्
बलिभूतानामाह्वानं त्वां मृत्यो ह्यस्माकम्
आत्ममानिता मृतेर्ज्यायसी बलान्विता नूनम्
अस्माकं किमु कारागारं मृत्युंजयिनो वयम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥२॥
विकीर्य खदिरांगारान् मार्गे स्वकरैः प्रतिचरणम्
ध्येयपथा बहुवारं तरसा कृतं नु चंक्रमणम्
विश्रामं पथि कदा न चरितं न परावृत्येक्षितम्
प्रीतेर्बंधः कीर्तेरथवा रोद्धं नो नालम्
ध्येयमुन्नतं पुरतो यद्यपि चरणाधो ज्वलनम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥३॥
प्राणा भित्तिं समुल्लंघ्य रे! गच्छत मरुता समम्
निवेदयध्वं मात्रे खेदं नो मानसनिहितम्
कथयत चेह सुतास्ते मुग्धा ध्वान्ते प्राणिपातम्
बद्धांजलयो हन्त जननि! ते समर्पयन्तेऽन्त्यम्
मातः स्वातंत्र्यं तेऽस्माकं ह्यनिवार्यं ध्येयम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥४॥
हन्त करा नो निगडग्रस्ता उन्नयतां ते ध्वजम्
कीर्तयतां ते यशसो गाथां गलेषु संनहनम्
बहूपराद्धं खलु तैश्चरितं यैस्त्वत्पदनमनम्
अस्माकं खलु मौढ्यमर्पितं ते जीवनमर्घ्यम्
मूढानां नो भगवति मातः कच्चित् भव शरणम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥५॥

साश्रुलोचने किमिति जननि! ते भाग्यं ते भव्यम्
यामिन्युदरादवश्यमचिराद् उषसः श्वो जननम्
यदा श्मशाने नो निष्प्राणा देहा दह्यन्ते
वह्निशिखातः क्रांतिधुरीणास्तदा प्रजायन्ते
त्वत्पदनद्धा संतृट्यन्ति हि निगडा नातिचिरम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥६॥
आरभतां ओंकारतांडवं ग्रासग्रसनार्थन्
सघोषनृत्यं बलिनः कंठे सहस्व घनपाशम्
आगच्छन्तु क्रूरा गृध्रा अन्तुमसृङ्मांसम्
उरःकपाटं विपाटितं ननु पश्य तदर्थमिदम्
कलेवराणां कुरुष्व मृत्यो संहारं कामम्
क्रांतिदेवताजयजयकारं गर्जत निर्भ्रान्तम्॥७॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

(By: Vaidya Shriniwas P. Hirlekar)